শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী প্রহ্লাদেন কৃতং

# ॥শ্রী হর্যষ্টকম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী হর্যষ্টকম্ ॥

হরির্হরতি পাপানি দুষ্টচিত্তৈরপি স্মৃতঃ।
অনিচ্ছযাপি সংস্পৃষ্টো দহত্যেৱ হি পাৱকঃ॥ ১ ॥

স গঙ্গা স গযা সেতুঃ স কাশী স চ পুষ্করম্।
জিহ্বাগ্রে ৱর্ততে যস্য হরিরিত্যক্ষর দ্বযম্॥ ২ ॥

ৱারাণস্যাং কুরুক্ষেত্রে নৈমিশারণ্য এৱ চ।
যতকৃতং তেন যেনোক্তং হরিরিত্যক্ষর দ্বযম্॥ ৩ ॥

পৃথিৱ্যাং যানি তীর্থানি পুণ্যান্যাযতনানি চ।
তানি সর্ৱাণ্যশেষাণি হরিরিত্যক্ষর দ্বযম্॥ ৪ ॥

গৱাং কোটিসহস্রাণি হেমকন্যাসহস্রকম্।
দত্তং স্যাত্তেন যেনোক্তং হরিরিত্যক্ষর দ্বযম্॥ ৫ ॥

ঋগ্বেদোথ যজুর্ৱেদঃ সামৱেদোপ্যথর্ৱণঃ।
অধীতস্তেন যেনোক্তং হরিরিত্যক্ষর দ্বযম্॥ ৬ ॥

অশ্বমেধৈর্মহাযজ্ঞৈঃ নরমেধৈস্তথৈৱ চ।
ইষ্টং স্যাত্তেন যেনোক্তং হরিরিত্যক্ষর দ্বযম্॥ ৭ ॥

প্রাণ প্রযাণ পাথেযং সংসার ৱ্যাধিনাশনম্।
দুঃখাত্যন্ত পরিত্রাণং হরিরিত্যক্ষর দ্বযম্॥ ৮ ॥

বদ্ধঃ পরিকরস্তেন মোক্ষায গমনং প্রতি।
সকৃদুচ্চারিতং যেন হরিরিত্যক্ষর দ্বযম্॥ ৯ ॥

হর্যষ্টকমিদং পুণ্যং প্রাতরুত্থায যঃ পঠেত্।
আযুষ্যং বলমারোগ্যং যশো ৱৃদ্ধিশ্শ্রিযাৱহম্॥ ১০ ॥

প্রহ্লাদেন কৃতং স্তোত্রং
দুঃখসাগর শোষণম্।

www.prapatti.com

যঃ পঠেতস নরো যাতি
তদ্বিষ্ণোঃ পরমং পদম্॥ ১১ ॥

॥ ইতি শ্রী হযগ্রীবাষ্টকং সংপূর্ণম্॥